|| অবতারত্রয়স্তোত্রম ||

পালয়স্ব নিপালয়স্ব নিপালয়স্ব রমাপতে |
বাদিরাজমুনীংদ্রবংদিত বাজিবক্ত্র নমোঽস্তু তে || প ||

মধ্বহৃৎকমলস্থিতং বরদায়কং করুণাকরং
লক্ষ্মণাগ্রজমক্ষয়ং দুরিতক্ষয়ং কমলেক্ষণম |
রাবণাংতকমব্যয়ং বরজানকীরমণং বিভুং
অংজনাসুতপাণিকংজনিষেবিতং প্রণমাম্য়হম || ১ ||

দেবকীতনয়ং নিজার্জুনসারথিং গরুডধ্বজং
পূতনাশকটাসুরাদিখলাংতকং পুরুষোত্তমম |
দুষ্টকংসনিমর্দনং বররুগ্মিণীপতিমচ্যুতং
ভীমসেনকরাংবুজেন সুসেবিতং প্রণমাম্যহম || ২ ||

জ্ঞানমুক্তিসুভক্তিদং বরবাদরায়ণমব্যয়ং
কোটিভাস্করভাসমানকিরীটকুংডলমংডিতম |
বাক্সুদর্শনতঃ কলেঃ শিরঘাতকং রময়া য়ুতং
মধ্বসৎকরকংজপূজিতমক্ষয়ং প্রণমাম্যহম || ৩ ||

|| ইতি শ্রীবাদিরাজপূজ্যচরণবিরচিতং অবতারত্রয়স্তোত্রম ||